# Shri RadhikAstavarAja Stotram

# श्रीराधिकास्तवराजस्तोत्रम्

## Document Information

Text title : rAdhikAstavarAjastotram

File name : rAdhikAstavarAjastotram.itx

Category : devii, rAdhA, stavarAja, devI

Location : doc_devii

Description-comments : sarasa stotrasangrahaH (Lucknow, 1909)

Latest update : November 4, 2017

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

December 22, 2023

*sanskritdocuments.org*

# श्रीराधिकास्तवराजस्तोत्रम्

श्रीमते रामानुजाय नमः ॥

ध्यायेन्नीलाम्बरीं श्यामां गौरवर्णां वराङ्गनाम् ।
वेदगुह्या गुणातीता राधाकृष्णसमन्विता ॥ १॥

मोहिनी सुन्दरी बाला रसरूपा हरिप्रिया ।
श्रीकृष्णवल्लभा राधा पुरुषोत्तमधीमतः ॥ २॥

तरुणा करुणा रक्ता अलङ्कारजितोपमा ।
निर्भया कोमला सीमा चन्द्रकोटिनिभानना ॥ ३॥

नूपुरा सहिता पद्मा पादयुग्ममनूपमा ।
केलिगर्भसमाजङ्घा नितम्बिनि मनोरमा ॥ ४॥

नीलाम्बरपरीधाना किङ्किणीकटिमेखला ।
कृशोदरी चातिनम्रा गोपपत्नी नमस्कृता ॥ ५॥

त्रिवलीनाभिगम्भीरा पीनतुङ्गपयोधरा ।
कस्तूरीमलयालिप्ता चर्चितावर्तुलस्तना ॥ ६॥

रत्नमुक्तामणीमाला कञ्चुकीपरिरञ्जिता ।
नानारत्नमयीग्रीवा शोभिता व्रजमण्डला ॥ ७॥

द्विभुजा सर्वदा शुभ्रा शीतला च वरप्रदा ।
कमला अङ्गदा सौम्या कङ्कणैः परिसम्मिता ॥ ८॥

मुद्रिकाङ्गुलियुक्ता च कोमला पदकारिका ।
अमिता अमृता पुण्या किशोरी कमलानना ॥ ९॥

मधुरी सरसी वाचा बिम्बोष्ठी कृष्णचुम्बिता ।
हसिता लसिता नम्रा नासामुक्तामनोहरा ॥ १०॥

चञ्चला चपला स्नेहा मदघूर्णितलोचना ।

स्वामिनी सुमुखी चन्द्रा भाले तिलकनिर्मिता ॥ ११॥

सिन्दूरकुङ्कुमारङ्गा बिन्दुकी परिराजिता ।
बतशोभाकरी धौता कनका कर्णकुण्डला ॥ १२॥

स्वर्णाम्बरान्विता रत्नशिरोमणिविराजिता ।
श्रतिनिर्माणदा श्यामा सुकेशी वेणुबन्धना ॥ १३॥

सर्वाभरणशोभाढ्या नानारत्नोपशोभिता ।
अपादकेशपर्यन्ता दृश्यता लज्जिता रमा ॥ १४॥

नेतिनेति चतुर्वेदा ब्रुवन्ति श्रुतिगोचराः ।
निजकाननमध्यस्था राधिका कृष्णतल्पगा ॥ १५॥

पयःफेननिभारौप्या कृष्णभाग्यव्रजाङ्गना ।
मैथुनीचातुरी श्यामा विपरीतरतिप्रदा ॥ १६॥

दामिनी मेघसंयुक्ता प्रकाशा व्रजमण्डला ।
पीता कृष्णयुताश्लिष्टा उदिता चन्द्रमण्डला ॥ १७॥

सुगन्धवासिताङ्गी च सुरभिः पुष्पसंयुता ।
लोपिता कुलमर्यादा रासकेलिपराक्रमा ॥ १८॥

स्वप्रकामा महावीर्या ब्रह्मरूपधरा वरा ।
मन आकर्षणी भामा आनन्दा कृष्णसेविता ॥ १९॥

सुरूपा सुभगा गोप्या रासमण्डलसंस्थिता ।
तेजस्विनी परा गौरी भामिनी मोक्षदायिका ॥ २०॥

पुरीमार्गस्थिता नित्या पादगुल्मप्रकाशिका ।
तरुणी रूपसम्पन्ना सुधासिन्धुरसायना ॥ २१॥

गोपिका नायिका कन्या कौमारी नवयौवना ।
स्वरूपा हेमवर्णाभा व्रजभूषणभूषिता ॥ २२॥

उज्झिता वेदमर्यादा निर्मला तनुगर्विता ।
आभीरनागरी कन्या कामिनी कृष्णयोषिता ॥ २३॥

गजिस्तम्भकरी रम्भा आनन्दा रसदायिका ।
राधिका मुद्रितज्योत्स्ना कृष्णकेलिस्थिरा मनाः ॥ २४॥

वल्लवी वनिता मुख्या गोपिका सुखदायिका ।
प्रणिता प्रेरिता रम्या रमिता गुणसागरा ॥ २५॥

मातङ्गिनी महामत्ता मधुपानपरायणा ।
वृषभानुसुता राधा दर्पिता कृष्णजल्पिता ॥ २६॥

अमोघा प्रियवादिन्या मङ्गला मङ्गलप्रिया ।
सुमहा सत्यवादिन्या सखीभिः परिवारिता ॥ २७॥

कृष्णनामसदाध्येया कृष्णनामसदारता ।
कृष्णनामसदावक्त्रा कृष्णनामहृदिस्थिता ॥ २८॥

वनचरी वरपुत्री च मदाघूर्णितवल्लभा ।
गेहिनी त्वरिता रम्या कृष्णयोग्या महोत्तमा ॥ २९॥

मनस्विनी कृपाकर्त्री कलगीतनि नर्त्तकी ।
वन्दिता च स्तुता नम्या पूजिता फलदेवता ॥ ३०॥

दध्योदनसुधाभोज्या कृष्णदर्शनलालसा ।
नवेदवेदविज्ञेया ब्रह्मशङ्करवाञ्छिता ॥ ३१॥

परस्परकृतानन्दा कमला विस्मितानना ।
नखाङ्कितकृता देहा सावित्री सम्भ्रमा उमा ॥ ३२॥

अङ्गदा सुखदा सीमा हेमवल्लीवनोपमा ।
ताम्बूलचर्च्चिता रत्ना सम्पुटा सम्मुखोन्मुखा ॥ ३३॥

पठिता कृष्णसन्तुष्टा हसिता वृषभानुजा ।
राधिकाराधिता राधा राधिका कृष्णदेवता ॥ ३४॥

इति श्रीगौतमीतन्त्रे श्रीकृष्णोक्त श्रीराधिकास्तवराजः सम्पूर्णम् ॥

Proofread by Pallasena Narayanaswami ppnswami at gmail.com
From shrI sarasa stotrasangrahaH (Lucknow, 1909).

*Shri RadhikAstavarAja Stotram*

pdf was typeset on December 22, 2023

Please send corrections to *sanskrit@cheerful.com*